# संस्कृतवार्ता:

**दिनाङ्क :- 13.05.2025 प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमन्त्री-सम्बोधनम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितं यत् सिन्दूराभियानस्य अस्थायीरूपेण स्थगनं कोऽपि निष्कर्ष: नैवास्ति यतो हि भारतम् आगामिषु दिवसेषु पाकिस्तानदेशस्य प्रत्येकस्य सम्भाव्यपदक्षेपस्य आङ्कलनं करिष्यति यस्तु इदं सुनिश्चीयते यत् तस्य भविष्यस्य पदक्षेप: तस्य प्रतिबद्धतानुरूपम् स्यादिति। ह्य: सायंकाले दृश्य-श्रव्य-परान्तर्जालीयसन्देशे राष्ट्रं सम्बोधयन् प्रधानमन्त्री अभिव्यक्तवान् यत् सिन्दूराभियानस्य आरम्भस्य प्रथमेषु त्रिषु दिवसेषु पाकिस्तानदेश: अपेक्षितात् इतोऽपि अधिकं हानिं प्राप्नोत्। श्रीमोदी अग्रे प्रावोचत् यत् भारतस्य आक्रामकयुतानां प्रत्युत्तरकार्याचरणानाम् अनन्तरं पाकिस्तानदेश: स्वव्याकुलतां न्यूनीकर्तुं उपायान् अन्वेष्टुं प्रयासान् समारब्धवान् अथ च वर्धमानां स्वव्याकुलतां दूरीकर्तुं वैश्विकसमुदायं समाहूतवान्। प्रधानमन्त्रिणा भारतस्य सुरक्षासिद्धान्तस्य त्रय: प्रमुखा: स्तम्भा: रेखाङ्किता: तेष्वेव प्रथम: स्तम्भ: निर्णायकं प्रत्युत्तरसंवलितं कार्याचरणमस्तीति।

अत्रावधौ श्रीमोदी विश्वाय कठोरसन्देशं प्रेषितवान् यत् पाकिस्तानदेशेन सह कापिचर्चा केवलम् आतङ्कवादे केन्द्रिता भविष्यति तथा च पाकिस्तानेन सह कापि चर्चा पाकिस्तानाधिकृतकश्मीरैव आधारिता भविष्यति।

### रक्षा-सूचना

वायुसञ्चालनमहानिदेशक: एयर्. मार्शल्.- ए.के. भारती इत्येष: सबलतया कथितवान् यत् भारतस्य सङ्घर्ष: आतङ्कवादिनां विरुद्धं तेषाञ्च समर्थनपराया: आधारभूतावसंरचनाया: विरुद्धं वर्तते न तु पाकिस्तानदेशस्य सेनया सह इति। असौ अवदत् यत् दु:खवहो विषयो वर्तते यत् पाकिस्तानदेशीया सेना हस्तक्षेपं कृत्वा आतङ्कवादिनां पक्षं स्वीकृतवती। येन कारणेन भारतीय सशस्त्र बलै: तादृशतेव प्रत्युत्तर प्रदातुं बाध्य जातम्। ह्य: नवदिल्ल्यां सिन्दूराभियानं विषयम् अवलम्ब्य वार्ताहरान् संसूचयन् एयर्. मार्शल्. भारती-इत्ययं सूचितवान् यत् सिन्दूराभियानावधौ भारतीयसेनयादेशस्य नागरिका: सैन्यसंरचना: च केनापि प्रकारेण न्यूनातिन्यूनं हानि: प्रदत्ता:।

### शाह:-जयशङ्कर:

गृहमन्त्री अमितशाह: भारतीयसशस्यबलानाम् अतुल्यशूरताया: अभिवादनं कृत्वा तानि देशस्य कवचं शत्रूविनाशकं चेति उक्तवान्। सामाजिकसन्देशपटले श्रीशाह: पहलगामातङ्क्याक्रमणे मृतान् जनान् न्यायं प्रदातुम् अनुकरणीयनेतृत्वयुताय प्रधानमन्त्रिणे नरेन्द्रमोदिने वर्धापनानि अयच्छत्। अनेनोक्तं यत् श्रीमोदी सुदृढीकृतवान् यत् देशाय कोऽपि शत्रु: दण्डात् मुक्तो नैव भवितुं शक्नोति। श्रीशाह: सीमा-सुरक्षाबलस्य वीरसैनिकान् अपि अभिनन्दितवान्।

### तिरङ्गायात्राया:

भारतीयजनतापार्टीतिदलम् सिन्दूराभियानस्य प्राप्तसफलताया: अनन्तरं समग्रे हि देशे तिरङ्गायात्राया: प्रारम्भं करिष्यति। अस्य मासस्य त्रयोविंशति दिनाङ्कं यावत् प्रचाल्यमानायां तिरङ्गायात्रायां समाजस्य प्रमुखा: सदस्या: भूतपूर्वसैनिका: सामाजिककार्यकर्तारश्च सम्मिलिता: भविष्यन्ति।

### आई.पी.एल्.

बी.सी.सी.आई. इत्यनेन समुद्घोषितं यत् इण्डियन-प्रीमीयर-लीग-इति क्रिकेट्-प्रतिस्पर्धा अस्यमासस्य सप्तदशदिनाङ्के पुन: समारप्स्यते यतो हि इयं स्पर्धामालिका भारत-पाकिस्तान-देशयोर्मध्ये जातस्य सङ्घर्षस्य कारणेन आसप्ताहं यावत् स्थगिता जाता। भारतेन उत्थापितस्य सिन्दूराभियानस्य कारणेन मेमासे नवमे दिनाङ्के इयं स्थगिता अभवत्। सम्प्रति मेमासस्य सप्तदशदिनाङ्के बेंगलुरुनगरस्य एम्. चिन्नास्वामि-क्रीडाङ्गणे रॉयल-चैलेन्जर्स-बेंगलुरू-कोलकाता-नाइट-राइडर्स-दलयोर्मध्ये सामुख्यं भविष्यति।

॥ इति वार्ता:॥